## छत्रादिभ्यो णः । (६२/१६१२)

छत्र इत्येवमादिभ्यः [1]प्रातिपदिकेभ्यो [2]णः प्रत्ययो भवति तदस्य शीलम् इत्येतस्मिन् विषये । ठकोऽपवादः । छत्रं शीलमस्य छात्रः । छादनादावरणाच्छत्रम् । गुरुकार्येष्वहितः[3]तच्छिद्रावरणप्रवृत्तः छत्रशीलः [4]शिष्यः छात्रः । स्थाशब्दोऽत्र पठ्यते, स उपसर्गपूर्वो[5]ऽत्र गृह्यते आस्था संस्था अवस्था इति ।

छत्र । [6]बुभुक्षा । [7]शिक्षा । [8]पुरोह । स्था । चुरा । [9]उपस्थान । [10]ऋषि । [11]कर्मन् । [12]विश्वधा । तपस् । सत्य । [13]अनृत । [14]शिबिका । छत्रादिः ॥

## कर्माध्ययने वृत्तम् । (६३/१६१४)

तदस्य इत्येव । तदिति प्रथमासमर्थादस्य इति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत्प्रथमासमर्थं कर्म चेत् तद् वृत्तमध्ययनविषयं भवति । एकमन्यदध्ययने कर्म वृत्तमस्य ऐकान्यिकः । द्वैयन्यिकः । त्रैयन्यिकः । एकमन्यत् इति विगृह्य तद्धितार्थ इति समासः । ततश्च ठक् [15]प्रत्ययः । अध्ययने कर्म वृत्तम् इत्येतत् सर्वं तद्धितवृत्तावन्तर्भवति । यस्याध्ययनप्रयुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूपमेकं जातं स उच्यते ऐकान्यिकः इति । [16]एवं द्वैयन्यिकः त्रैयन्यिक [17]इति ॥

## बह्वच्पूर्वपदाट् ठच् । (६४/१६१५)

बह्वच् पूर्वपदं यस्य तस्माद् बह्वच्पूर्वपदात् प्रातिपादिकात् ठच् प्रत्ययो भवति तदस्य कर्माध्ययने वृत्तम् इत्येतस्मि[18]न्नर्थे । ठकोऽपवादः । द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः । त्रयोदशान्यिकः । चतुर्दशान्यिकः । चतुर्दशापपाठा अस्य जाता इत्यर्थः । उदात्ते कर्तव्ये योऽनुदात्तं करोति स उच्यते अन्यत् त्वं करोषि इति ॥

## हितं भक्षाः । (६५/१६१६)

तदस्य इत्येव । तदिति प्रथमासमर्थादस्य इति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत् तत्प्रथमासमर्थं हितं चेत्तद् भवति, तच्च च [19]भक्षाः । ननु च हितयोगे चतुर्थ्या भवितव्यं, तत्र कथं षष्ठ्यर्थे प्रत्ययो विधीयते ? एवं तर्हि सामर्थ्याद् विभक्तिविपरिणामो भविष्यति । अपूपभक्षणं हितमस्मै आपूपिकः । शाष्कुलिकः । मौदकिकः । [20]हितार्थक्रिया च तद्धितवृत्तावन्तर्भवति ॥

---

1. प्रातिपदिकेभ्यः नास्ति फ. 2. अण् फ. 3. तच्छिद्रावरणे ह. 4. शिष्यः नास्ति फ. 5. अत्र नास्ति ब. 6. नास्ति ब. ह, भुक्षा इ, भृक्ष्य क. 7. धुक्षा ह, भिक्षा तितिक्षा फ. 8. पुरः एव पुराः ह, प्ररोह ब. ड, परोह क. 9. नास्ति ह. 10. कृषिः ब. क. ह. 11. कर्मकरः क. ह. फ. 12. वैर इत्यधिकम् ब. 13. अनुमत ह. 14. विशिक क. 15. प्रत्ययः नास्ति फ, भवति इत्यधिकम् ब. 16. एवं नास्ति फ. 17. इति नास्ति ब. 18. विषये ब. क. 19. भक्ष्यः क. इ. 20. हितार्थः क्रिया च ब. इ. ह, हितं भक्षणक्रिया ड.